सन्धत्ते रक्तं स्कन्दयते हिमम्। तथा सम्पाचयेद्भस्म दाहः सङ्कोचयेत् सिराः। अस्कन्दमाने रुधिरे सन्धानानि प्रयोजयेत्। सन्धाने भ्रश्यमाने तु पाचनैः समुपाचरेत्॥ कल्पैरेतैस्त्रिभिर्वैद्यः प्रयतेत यथाविधि। असिद्धिमत्सु चैतेषु दाहः परम इष्यते। सशेषदोषे रुधिरे न व्याधिरतिवर्त्तते। सावशेषे ततः स्थेयं न तु कुर्य्यादतिक्रमम्॥ देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते। तस्माद्यत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः॥ स्रुतरक्तस्य सेकाद्यैः शीतैः प्रकुपितेऽनिले। शोफं सतोदं कोष्णेन सर्पिषा परिषेचयेत्॥

नृपाढ्यबालस्थविरभीरुदुर्ब्बलनारीसुकुमाराणामनुग्रहार्थं परमसुकुमारोऽयं शोणितावसेचनोपायोऽभिहितो जलौकसः। तत्र वातपित्तकफदुष्टशोणितं यथासंख्यं शृङ्गजलौकालावुभिरवसेचयेत् स्निग्धशीतरूक्षत्वात् सर्व्वाणि सर्व्वैर्वा। भवन्ति चात्र। उष्णं समधुरं स्निग्धं गवां शृङ्गं प्रकीर्त्तितम्। तस्माद्वातोपसृष्टे तु हितं तदवसेचने। शीताधिवासा मधुरा जलौका वारिसम्भवा। तस्मात्पित्तोपसृष्टे तु हिता सा त्ववसेचने। अलावु कटुकं रूक्षं तीक्ष्णञ्च परिकीर्त्तितम्। तस्माच्छ्लेष्मोपसृष्टे तु हितं तदवसेचने। तत्र प्रच्छिते तनुवस्त्रपटलावनद्धेन शृङ्गेण शोणितमवसेचयेदाचूषणात्। सान्तर्दीपयाऽलाव्वा"। जलौकसां विवरणम् अस्रपाशब्दे वक्ष्यते।

"अथ जलौकोऽवसेकसाध्यव्याधितमुपवेश्य संवेश्य वा विरूक्ष्य चास्य तमवकाशं मृद्गोमयचूर्णैर्यद्यरुजः स्यात्। गृहीताश्च ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रीः सलिलसरकमध्ये मुहूर्त्तस्थिता विगतक्लमा ज्ञात्वा ताभीरोगं ग्राहयेत्। श्लक्ष्णशुक्लार्द्रपिचुप्लोतावच्छन्नां कृत्वा मुखमपावृणुयाद्गृह्णन्त्यै क्षीरविन्दुं शोणितविन्दुं वा दद्याच्छस्त्रपदानि वा कुर्व्वीत यद्येवमपि न गृह्णीयात्तदान्यां ग्राहयेत्। यदा च निविशतेऽश्वखुरवदाननं कृत्वोन्नम्य च स्कन्धं तदा जानीयाद्गृह्णातीति गृह्णन्तीं चार्द्रवस्त्रावच्छन्नां धारयेत् सेचयेच्च। दंशे तोदकण्डूप्रादुर्भावैर्जानीयाच्छुद्धमियमादत्त इति शुद्धमाददानामपनयेत्। अथ शोणितगन्धेन न मुञ्चेन्मुखमस्याः सैन्धवचूर्णेनावकिरेत्। अथ पतितां तण्डुलकण्डनप्रदिग्धगात्रीं तैललवणाभ्यक्तमुखीं वामहस्ताङ्गुष्ठाङ्गुलिभ्यां गृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठाङ्गुलिभ्यां शनैः शनैरनुलोममनुमार्जयेदा मुखाद्वामयेत्तावद्यावत्सम्यग्वान्तलिङ्गानीति। सम्यग्वान्ता सलिलसरकन्यस्ता भोक्तुकामा सती चरेत्। या सीदति न चेष्टते सा दुर्व्वान्ता तां पुनः सम्यग्वामयेत्। दुर्व्वान्ताया व्याधिरसाध्य इन्द्रमदो नाम भवति। अथ सुवान्तां पूर्व्ववत्सन्निदध्यात् शोणितस्य च योगायोगानवेक्ष्य जलौकोव्रणान्मधुनावघट्टयेच्छीताभिरद्भिश्च परिषेचयेद्बध्नीत वा व्रणं कषायमधुरस्निग्धशीतैश्च प्रदेहैः प्रदिह्यादिति। भवति चात्र। क्षेत्राणि ग्रहणं जातीः पोषणं सावचारणम्। जलौकसाञ्च यो वेत्ति तत्साध्यान् स जयेद्गदान्"।

**असृज्** न० न सृज्यते इतररागवत् संसृज्यते सहजत्वात् न+सृज्—क्विन्, अस्यते क्षिप्यते इतस्ततो नाडीभिः अस् ऋजि वा। १शोणिते २मङ्गलग्रहे च तस्य रक्तवर्णत्वात्तथात्वम्। कुङ्कुमे, ३विष्कम्भावधिके ४षोड़शे योगे। शोणितोत्पत्तिरुक्ता भाव०प्र०। "यदा रसो यकृद्याति तत्र रञ्जकपित्ततः। रागं पाकञ्च संप्राप्य स भवेद्रक्तसंज्ञकः। रक्तं सर्व्वशरीरे तु जीवस्याधार उत्तमः। स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत्"। तस्योत्तमत्वञ्चोक्तं तत्रैव "जीवोवसति सर्व्वस्मिन् देहे तत्र विशेषतः"। वीर्य्ये रक्ते मले तस्मिन् क्षीणे याति क्षयं क्षणात्"। वीर्य्ये रक्ते मले च शरीरारम्भके वाग्भटोक्तपरिमाणयुते शुद्धे जीवोवसति न तु दुष्टे प्रदुष्टे रक्तस्रावणोपदेशस्य विधानात्। पित्तवद्भवेदम्ल' भवेदित्यर्थः॥ तस्य स्थानम्" "यकृत् प्लीहा च रक्तस्य मुख्यस्थानं तयोः स्थितम्"। अन्यत्र संस्थितवतां रक्तानां "पीतता भवेत्" इति भा०प्रका०। सुश्रुते शोणितोत्पादविवरणमन्यथोक्तं यथा "अथातः शोणितवर्णनीयमध्यायं व्याख्यास्यामः। तत्र पाञ्चभौतिकस्य चतुर्विधस्य षड्रसस्य द्विविधवीर्य्यस्याष्टविधवीर्य्यस्य वानेकगुणस्योपयुक्तस्य आहारस्य सम्यक् परिणतस्य यस्तेजोभूतः सारः परमसूक्ष्मः स रस इत्युच्यते। तस्य च हृदयं स्थानं स हृदयाच्चतुर्व्विंशतिं धमनीरनुप्रविश्योर्द्ध्वगा दश दश चाधोगामिन्यश्चतस्रश्च तिर्य्यग्गाः कृत्स्नं शरीरमहरहस्तर्पयति वर्द्धयति धारयति यापयति जीवयति चादृष्टहेतुकेन कर्म्मणा। तस्य शरीरमनुधावतोऽनुमानाद्गतिरुपलक्षयितव्या क्षयवृद्धिवैकृतैः। तस्मिन् सर्व्वशरीरावयवदोषधातुमलाशयानुसारिणि रसे जिज्ञासा किमयं सौम्यस्तैजस इति। अत्रोच्यते स खलु द्रवानुसारी स्नेहनजीवनतर्पणधारणादिभिर्विशेषैः सौम्य इत्यवगम्यते। स खल्वाप्यो रसो यकृत्प्लीहानौ प्राप्य रागमुपैति। भवतश्चात्र॥ "रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम्।